শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ পঞ্চদশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ পঞ্চদশঃ সর্গঃ ॥

## ঋষ্যশৃঙ্গেণ রাজ্ঞো দশরথস্য পুত্রেষ্টিযজ্ঞস্যারম্ভো দেৱানাং প্রার্থনযা ব্রহ্মণা রাৱণৱধোপাযস্যানুসন্ধানং ভগৱতা ৱিষ্ণুনা দেৱানামাশ্ৱাসনম্

মেধাৱী তু ততো ধ্যাৎৱা স কিঞ্চিদিদমুত্তরম্।
লব্ধসংজ্ঞস্ততস্তং তু ৱেদজ্ঞো নৃপমব্রৱীৎ॥ **1.15.1** ॥

ইষ্টিং তেঽহং করিষ্যামি পুত্রীযাং পুত্রকারণাৎ।
অথর্ৱশিরসি প্রোক্তৈর্মন্ত্রৈঃ সিদ্ধাং ৱিধানতঃ॥ **1.15.2** ॥

ততঃ প্রাক্রমদিষ্টিং তাং পুত্রীযাং পুত্রকারণাৎ।
জুহাৱাগ্নৌ চ তেজস্ৱী মন্ত্রদৃষ্টেন কর্মণা॥ **1.15.3** ॥

ততো দেৱাঃ সগন্ধর্ৱাঃ সিদ্ধাশ্চ পরমর্ষযঃ।
ভাগপ্রতিগ্রহার্থং ৱৈ সমৱেতা যথাৱিধি॥ **1.15.4** ॥

তাঃ সমেত্য যথান্যাযং তস্মিন্ সদসি দেৱতাঃ।
অব্রুৱন্ লোককর্তারং ব্রহ্মাণং ৱচনং ততঃ॥ **1.15.5** ॥

ভগৱংস্ত্ৱৎপ্রসাদেন রাৱণো নাম রাক্ষসঃ।
সর্ৱান্ নো বাধতে ৱীর্যাচ্ছাসিতুং তং ন শক্নুমঃ॥ **1.15.6** ॥

ৎৱযা তস্মৈ ৱরো দত্তঃ প্রীতেন ভগৱংস্তদা।
মানযন্তশ্চ তং নিত্যং সর্ৱং তস্য ক্ষমামহে॥ **1.15.7** ॥

উদ্বেজযতি লোকাংস্ত্রীনুচ্ছ্রিতান্ দ্বেষ্টি দুর্মতিঃ।
শক্রং ত্রিদশরাজানং প্রধর্ষযিতুমিচ্ছতি॥ **1.15.8**॥

ঋষীন্ যক্ষান্ সগন্ধর্ৱান্ ব্রাহ্মণানসুরাংস্তথা।
অতিক্রামতি দুর্ধর্ষো ৱরদানেন মোহিতঃ॥ **1.15.9**॥

নৈনং সূর্যঃ প্রতপতি পার্শ্ৱে ৱাতি ন মারুতঃ।
চলোর্মিমালী তং দৃষ্ট্ৱা সমুদ্রোঽপি ন কম্পতে॥ **1.15.10**॥

তন্মহন্নো ভযং তস্মাদ্ রাক্ষসাদ্ ঘোরদর্শনাৎ।
ৱধার্থং তস্য ভগৱন্নুপাযং কর্তুমর্হসি॥ **1.15.11**॥

এৱমুক্তঃ সুরৈঃ সর্ৱৈশ্চিন্তযিৎৱা ততোঽব্রৱীৎ।
হন্তাযং ৱিদিতস্তস্য ৱধোপাযো দুরাত্মনঃ॥ **1.15.12**॥

তেন গন্ধর্ৱযক্ষাণাং দেৱতানাং চ রক্ষসাম্।
অৱধ্যোঽস্মীতি ৱাগুক্তা তথেত্যুক্তং চ তন্মযা॥ **1.15.13**॥

নাকীর্তযদৱজ্ঞানাৎ তদ্ রক্ষো মানুষাংস্তদা।
তস্মাৎ স মানুষাদ্ ৱধ্যো মৃত্যুর্নান্যোঽস্য ৱিদ্যতে॥ **1.15.14**॥

এতচ্ছ্রুৎৱা প্রিযং ৱাক্যং ব্রহ্মণা সমুদাহৃতম্।
দেৱা মহর্ষযঃ সর্ৱে প্রহৃষ্টাস্তেঽভৱংস্তদা॥ **1.15.15**॥

এতস্মিন্নন্তরে ৱিষ্ণুরুপযাতো মহাদ্যুতিঃ।
শঙ্খচক্রগদাপাণিঃ পীতৱাসা জগৎপতিঃ॥ **1.15.16**॥

ৱৈনতেযং সমারুহ্য ভাস্করস্তোযদং যথা।
তপ্তহাটককেযূরো ৱন্দ্যমানঃ সুরোত্তমৈঃ॥ **1.15.17**॥

ব্রহ্মণা চ সমাগত্য তত্র তস্থৌ সমাহিতঃ।
তমব্রুৱন্ সুরাঃ সর্ৱে সমভিষ্টূয সন্নতাঃ॥ **1.15.18**॥

ৎৱাং নিযোক্ষ্যামহে ৱিষ্ণো লোকানাং হিতকাম্যযা।
রাজ্ঞো দশরথস্য ৎৱমযোধ্যাধিপতের্ৱিভো॥ **1.15.19**॥

ধর্মজ্ঞস্য ৱদান্যস্য মহর্ষিসমতেজসঃ।
অস্য ভার্যাসু তিসৃষু হ্রীশ্রীকীর্ত্যুপমাসু চ॥ **1.15.20**॥

ৱিষ্ণো পুত্রৎৱমাগচ্ছ কৃৎৱাঽঽত্মানং চতুর্ৱিধম্।
তত্র ৎৱং মানুষো ভূৎৱা প্রৱৃদ্ধং লোককণ্টকম্॥ **1.15.21**॥

অৱধ্যং দৈৱতৈর্ৱিষ্ণো সমরে জহি রাৱণম্।
স হি দেৱান্ সগন্ধর্ৱান্ সিদ্ধাংশ্চ ঋষিসত্তমান্॥ **1.15.22**॥

রাক্ষসো রাৱণো মূর্খো ৱীর্যোদ্রেকেণ বাধতে।
ঋষযশ্চ ততস্তেন গন্ধর্ৱাপ্সরসস্তথা॥ **1.15.23**॥

ক্রীডন্তো নন্দনৱনে রৌদ্রেণ ৱিনিপাতিতাঃ।
ৱধার্থং ৱযমাযাতাস্তস্য ৱৈ মুনিভিঃ সহ॥ **1.15.24**॥

সিদ্ধগন্ধর্ৱযক্ষাশ্চ ততস্ত্ৱাং শরণং গতাঃ।
ৎৱং গতিঃ পরমা দেৱ সর্ৱেষাং নঃ পরন্তপ॥ **1.15.25**॥

ৱধায দেৱশত্রূণাং নৃণাং লোকে মনঃ কুরু।
এৱং স্তুতস্তু দেৱেশো ৱিষ্ণুস্ত্রিদশপুঙ্গৱঃ॥ **1.15.26**॥

পিতামহপুরোগাংস্তান্ সর্ৱলোকনমস্কৃতঃ।
অব্রৱীৎ ত্রিদশান্ সর্ৱান্ সমেতান্ ধর্মসংহিতান্॥ **1.15.27**॥

ভযং ত্যজত ভদ্রং ৱো হিতার্থং যুধি রাৱণম্।
সপুত্রপৌত্রং সামাত্যং সমন্ত্রিজ্ঞাতিবান্ধৱম্॥ **1.15.28**॥

হৎৱা ক্রূরং দুরাধর্ষং দেৱর্ষীণাং ভযাৱহম্।
দশৱর্ষসহস্রাণি দশৱর্ষশতানি চ॥ **1.15.29**॥

ৱৎস্যামি মানুষে লোকে পালযন্ পৃথিৱীমিমাম্।
এৱং দত্ত্বা ৱরং দেৱো দেৱানাং ৱিষ্ণুরাত্মৱান্॥ **1.15.30** ॥

মানুষ্যে চিন্তযামাস জন্মভূমিমথাত্মনঃ।
ততঃ পদ্মপলাশাক্ষঃ কৃৎৱাঽঽত্মানং চতুর্ৱিধম্॥ **1.15.31** ॥

পিতরং রোচযামাস তদা দশরথং নৃপম্।
ততো দেৱর্ষিগন্ধর্ৱাঃ সরুদ্রাঃ সাপ্সরোগণাঃ।
স্তুতিভির্দিৱ্যরূপাভিস্তুষ্টুৱুর্মধুসূদনম্॥ **1.15.32** ॥

তমুদ্ধতং রাৱণমুগ্রতেজসং
প্রৱৃদ্ধদর্পং ত্রিদশেশ্ৱরদ্বিষম্।
ৱিরাৱণং সাধুতপস্ৱিকণ্টকং
তপস্ৱিনামুদ্ধর তং ভযাৱহম্॥ **1.15.33** ॥

তমেৱ হৎৱা সবলং সবান্ধৱং
ৱিরাৱণং রাৱণমুগ্রপৌরুষম্।
স্ৱর্লোকমাগচ্ছ গতজ্ৱরশ্চিরং
সুরেন্দ্রগুপ্তং গতদোষকল্মষম্॥ **1.15.34** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে পঞ্চদশঃ সর্গঃ ॥